संस्कृत

याडिरकु
विधि:

अजपा-जप विधी

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

॥ श्रीः ॥

(1)

श्रीपरमेश्वरप्रीत्यर्थं २

॥ श्रीगणेशायनमः॥ अथअजपाजपविधिप्रारंभः॥ आचम्य०॥ देश
॥ कालौ संकीर्त्य अफलप्राप्त्यर्थं पूर्वाहोरात्रकृतं अजपाजपमहं तत्तत्स्था
॥ नतत्तद्देवताभ्यः यथासंख्यं निवेदयामि॥ षट्शतंगणेशायषट्सह
॥ स्रंप्रजापतेः॥ षट्सहस्रंगदापाणेः षट्सहस्रंपिनाकिने॥ जीवात्मनेस
॥ हस्रंतुसहस्रंगुरवेर्पयेत्॥ परब्रह्मस्वरूपायसहस्रंविनिवेदयेत्॥
॥ आचम्य०॥ देशकालौ० फलप्राप्त्यर्थंश्रीपरमेश्वरप्रीत्यर्थंतिस्रःपुजा
॥ ग्रत्स्वप्नसुषुप्त्यवस्थासु ज्ञानात् अज्ञानात् अद्यसूर्योदयादारभ्य
॥ श्वः सूर्योदयपर्यंतं उच्छ्वासनिश्वासादिव्यवहार रूपेण षट्शताधि
॥ कमेकविंशति सहस्रसंख्याकं अजपाजपमहं करिष्ये॥ प्रणवेनन्या
॥ संकुर्यात्॥ अथध्यानं॥ ॐ हंसहंसायविद्महे परमहंसायधीमहि॥
॥ तन्नोहंसः प्रचोदयात्॥ मूलाधारे वारिजपत्रे चतुरंतं वंशंषंसंवर्णं
॥ विशालंस्फविशालं॥ रक्तंवर्णं श्रीगणनाथंहेरंबंदत्तात्रेयंश्रीपद
॥ पद्मंप्रणतोस्मि॥ १॥ स्वाधिष्ठाने षट्दलचक्रे तनुलिंगंबालास्यं
॥ तंवर्णविशालंस्फविशालं॥ पीतंवर्णं वाकुपतिरमणं हृदिनालंद
॥ त्तात्रे०॥ २॥ नाभीपद्मे यत्रदशारं डफवर्णं लक्ष्मीकांतं गरुडा
(1A)
॥ रूढं नरवीरं॥ नीलंवर्णं निर्गुणरूपं निगमांतंदत्तात्रे०॥ ३॥ हृत्
॥ पद्मांते द्वादशपत्रे कठवर्णं सांबंशैवं पूर्णमयंतंशिवशक्तिं॥ स्व
॥ र्गस्थानं कुंकुमवर्णं भगर्चतं दत्तात्रे०॥ ४॥ कंठस्थानेचक्रेविशु
॥ द्धंकमलांतंचंद्राकारं षोडशपत्रं स्वरवर्णं॥ मायाधीशंजीव
॥ शिवेशं परमंतंदत्तात्रे०॥ ५॥ अज्ञाचक्रे भ्रुकुटिस्थाने द्विदलांतं
॥ हक्षंबीजं ज्ञानसमुद्रं गुरुमूर्तिं॥ विद्युद्वर्णं ज्ञानमयंतं विरूपाक्षं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

॥ दत्तात्रे०॥ ६॥ मूर्ध्निस्थाने वारिजपत्रं शशिबीजं शुभ्रवर्णप
॥ त्रसहस्रंस्फविशालं ॥ हंबीजाक्षंवर्णसहस्रंतुरीयांतंदत्तात्रे०
॥ ७॥ ब्रह्मानंदं ब्रह्ममुकुंदं भवरूपंब्रह्मज्ञानं ज्ञानमयंतं भगवंतं
॥ ब्रह्मात्मानं ब्रह्ममुनींद्रं भसिताभंदत्तात्रे०॥ ८॥ शांताकारं
(1B) ॥ शेषशयानं स्फुरयं घंकां तानाथं कोमलगात्रं कमलाक्षं ॥ चे
॥ तोरत्नंचिद्घनपूर्णं द्विजराजंदत्तात्रे०॥ ९॥ हंसोगण्येशोविधि
॥ रेवहं सोहं सोहरिरंहं समस्तयशश्च भंतः ॥ हंसोपिजीवः परमेवहं
॥ सोहं सोहरिरंहं सम यश्च हं सः ॥ १०॥ इतिश्रीमत्परमहंसप
॥ रिव्राजकाचार्यविरचितं श्रीमच्छंकराचार्यविरचितं हंसस्तोत्रं
॥ संपूर्णं ॥ आधारेलिंगनाभौ प्रकटितहृदये तालमूलेलल
॥ लाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के ॥
॥ वासांतबालमध्ये डफकठसहिते कंठदेशे स्वराणां हंसंत
॥ त्वार्थयुक्तं सकलदलयुतं वर्णरूपं नमामि ॥ हकारेण बहिर्या
॥ ती सकारेण विशेषत्पुनः ॥ हंसोहं समिमंमंत्रं जीवो जपति
॥ सर्वदा ॥ अजपानाम गायत्री योगीनां मोक्षदायिनी ॥ तस्याः
(1C) ॥ संकल्पमात्रेण सर्वपापैः प्रमुच्यते ॥ ॥ इतिअजपाजपवि
धिः ॥ ॥ २२।६

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com